# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा–आचार्यप्रथमवर्षम्(SEM- 2) | **प्रश्नपत्रम् –५** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CE 4.2.2** | समय: - ११ त: ०२ |
| दिनाङ्क: - १५ -०४ -२०१९ | सन्दर्भग्रन्थः – लघुसिद्धान्तकौमुदी \| | |

..........................................................................................................

**प्रथमान्विति:**

**प्रश्न:-१ निम्नलिखितयोरेकस्य सूत्रस्य व्याख्या कार्या। (५)**

(१) सुपि च |

(२) आमि सर्वनाम्न: सुट् |

**प्रश्न:-२ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या | (१०)**

(१) रामौ (२) रामाभ्याम् (३) रामेषु (४) सर्वे (५) विश्वपो: (६) हरौ।

**द्वितीयान्विति:**

**प्रश्न:-३ निम्नलिखितयोरेकस्य सूत्रस्य व्याख्या कार्या | (५)**

(१) आङि चाप: |

(२) इकोऽचि विभक्तौ |

**प्रश्न:-४ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या | (१०)**

(१) रमायै (२) सर्वस्याम् (३) स्त्रिय: (४) ज्ञाने (५) ज्ञानानि (६) वारिणा।

**तृतीयान्विति:**

**प्रश्न:-५ निम्नलिखितयोरेकस्य सूत्रस्य व्याख्या कार्या | (५)**

(१) दश्च।

(२) न सम्प्रसारणे सम्प्रसारणम् |

**प्रश्न:-६ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या | (१०)**

(१) लिट् (२) के (३) इमौ (४) युवा (५) महत: (६) अमू।

**चतुर्थान्विति:**

**प्रश्न:-७ निम्नलिखितयोरेकस्य सूत्रस्य व्याख्या कार्या | (५)**

(१) नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ |

(२) अपो भि |

**प्रश्न:-८ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या | (१०)**

(१) उपानत्सु (२) वाक् (३) आप: (४) के (५) इमानि (६) अमूनि।

**प्रश्नः-९ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं लेख्यम् ?** **(१०)**

(१) 'राम' शब्दस्य तृतीयाविभक्तेः एकवचने कि रूपं भवति ?

(२) विभक्तिसंज्ञा केन सूत्रेण भवति ?

(३) 'सर्व' शब्दस्य चतुर्थीविभक्तेः एकवचने किं रूपं भवति ?

(४) 'पति' शब्दस्य तृतीयाविभक्तेः एकवचने किं रूपं भवति ?

(५) 'रमा' शब्दस्य सप्तमीविभक्तेः एकवचने किं रूपं भवति ?

(६) 'सर्वा' शब्दस्य चतुर्थीविभक्तेः एकवचने किं रूपं भवति ?

(७) 'ज्ञान' शब्दस्य सप्तमीविभक्तेः बहुवचने किं रूपं भवति ?

(८) 'वारि' शब्दस्य प्रथमाविभक्तेः बहुवचने किं रूपं भवति ?

(९) "लिह्" शब्दस्य तृतीयाविभक्तेः द्विवचने किं रूपं भवति ?

(१०) 'युवन्' शब्दस्य तृतीयाविभक्तेः एकवचने किं रूपं भवति ?

(११) 'महत्' शब्दस्य तृतीयाविभक्तेः द्विवचने किं रूपं भवति ?

(१२) 'अदस्' शब्दस्य (पुल्लिङ्गे) तृतीयाविभक्तेः एकवचने किं रूपं भवति ?

(१३) 'वाच्' शब्दस्य तृतीयाविभक्तेः द्विवचने किं रूपं भवति ?

(१४) 'उपानह्' शब्दस्य प्रथमाविभक्तेः एकवचने किं रूपं भवति ?

(१५) 'इदम्' शब्दस्य (नपुंसकलिङ्गे) प्रथमाविभक्तेः बहुवचने किं रूपं भवति ?

***